स्थिरः” इत्यन्तेन आत्मविवेके च उदयनाचार्य्यैः अहमिति प्रत्यक्षविषयत्वमादौ आत्मनोव्यवस्थाप्य देहाद्यतिरिक्तविषयत्वं तत्प्रत्ययस्य व्यवस्थापितं यथा ।

“अथात्मसद्भावे किम्प्रमाणं प्रत्यक्षमेव तावत् अहमिति विकल्पस्य प्राणभृन्मात्रसिद्धतात्। नचायमवस्तुकः सन्दिग्ध वस्तुकोवा, अशाब्दत्वादप्रतिक्षेपाच्च न च लैङ्गिकः, अननुसंहितलिङ्गस्यापि संप्रत्ययात्। नच स्मृतिरियम्, अननुभूते तदनुपपत्तेः। अनादिवासनावशादनादिरयमवस्तुकोविकल्पइत्यपि न युक्तं, नीलादिविकल्पसाधारण्यात्। इह वासनामुपादायानाश्वासे प्रमाणान्तरेऽपि कः समाश्वासः, यतो नीलादिविकल्पेषु समाश्वासःस्यात्। तस्माद्वासनामात्रवादं विहायागन्तुकमपि किञ्चित् कारणं वाच्यम्। तच्चाप्तानाप्तशब्दौ वा लिङ्गतदाभासौ वा प्रत्यक्षतदाभासौ वेति। तत्र यथा प्रथममध्यमप्रकाराभावान्नीलविकल्पस्वरसं कल्पमालम्बते तथाऽहमिति विकल्पोऽपि, तत्रापि “प्रत्यक्षपृष्ठभावित्वे साक्षादेव सवस्तुकः। तदाभासे तु मूलेऽस्य पारम्पर्य्यात् सवस्तुतेति”। न च बाह्यप्रत्यक्षनिवृत्तावेव निर्मूलत्वं, बुद्धिविकल्पस्यापि तथात्वप्रसङ्गात्। तत्र स्वसंवेदनं मूलम्, इहापि मानसप्रत्यक्षमिति न कश्चिद्विशेषः। शरीरादिवस्तुको भविष्यतीति चेन्न निरुपाधिशरीरेन्द्रियबुद्धितत् समुदायालम्बनत्वेऽतिप्रसङ्गात्। स्वसम्बन्धिशरीरादावयं स्यादिति वाच्यं तत्र कः स्वीयइति वचनीयम्। अनन्यत्वं स्वत्वं सर्वभावानां, तथा च यदा तेनैव तदनुभूयते तदा प्रत्येतुः प्रत्येतव्यादव्यतिरेकादहमिति स्यात्। अतएव घटादयोन कदाचिदनन्यानुभवितृका इति न कदाप्यहमास्पदमिति चेत् एवन्तर्हि त्वन्मतेऽप्यहंप्रत्ययः शरीरादावारोपरूपएव ततः प्रत्येतुरन्यत्वात्। बुद्धौ मुख्यएवेति चेन्न तस्याः क्रियात्वेनानुभूयमानाया भिन्नस्य कर्त्तुरहं छिनद्मीतिवदहं जानामीत्यनुभवात्। नीलादिप्रत्येतव्याकारवत् प्रतिपत्त्राकारोऽपि प्रतिपत्तेरेवायमात्मा तथा भासत इति चेत् तर्हि प्रत्येतव्यप्रतिपत्त्राकारयोस्तुल्ययोगक्षेमत्वात् सिद्धं नः समीहितम्। अस्तु स्वोपादानमात्रमिति चेन्न तत्प्रतिभासने तदाकारस्यापि प्रतिभासप्रसङ्गात् आकारमन्तरेणाकारिणोऽनवभासात्। प्रवृत्तिसन्तानाच्चान्योबुद्धिसन्तानः प्रतिपत्ता, वयं तमालयविज्ञानमाचक्ष्महे इति चेत् अस्तु तर्हि प्रवृत्तिविज्ञानोपादानमनादिनिधनः प्रतिपत्ता। स किं सन्तन्यमानज्ञानरूपः तद्विपरीतोवा इति चिन्तावशिष्यते निःशेषिता चासौ प्रागिति”। स्थानान्तरे च तत्रैव

“ननु सिद्धमिदं विशेषणं देहस्यैव चेतनत्वात् नैवं देहत्वभूतत्वमूर्त्तत्वरूपादिमत्त्वादिभ्यः। नच भूतानां समुदायपर्य्यवसितं चैतन्यं, प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वानुभूतस्यास्मरणप्रसङ्गात्। नच प्राक्पर्यवसितं, करचरणाद्यवयवविगमे तदनुभूतस्यास्मरणप्रसङ्गात्। देहस्य चेतनत्वे बालस्य प्रथमप्रवृत्तिप्रसङ्गाच्च इच्छाद्वेषावन्तरेण प्रयत्नानुपपत्तेः इष्टाभ्युपायताप्रतिसन्धानं विना चेच्छानुपपत्तेः। इह जन्मन्यननुभूतस्य प्रतिबन्धस्यास्मृतौ प्रतिसन्धानायोगात्, जन्मान्तरानुभूते चानुभवितरि भस्मासाद्भूते अन्येन स्मरणायोगात् अनुभवादीनां प्रवृत्त्यन्तानाञ्च कार्य्यकारणभावस्य इहैव जन्मनि निश्चितत्वात्। तथा च तदभावे तदभावस्य सुलभत्वात् अन्यथा स्वतन्त्रप्रसङ्गः। अतएव नेन्द्रियाणि चेतयन्ते दर्शनस्पर्शनाभ्यामेकार्थग्रहणाच्च। नच मनस्तथा, तस्य करणत्वेनैवानुभवादिति प्रतिबन्धसिद्धिः परदेहात्मसिद्धिश्च। अनादिश्चासौ वीतरागजन्मादर्शनात्, अनन्तश्च सतोऽनादित्वात्, द्रव्यञ्च समवायिकारणत्वात्, विभुश्च नित्यद्रव्यत्वे सत्यमूर्त्तत्वात्, अमूर्त्तश्च निष्क्रियत्वात्, निष्क्रियश्च नित्यद्रव्यत्वे सत्यस्मदादिप्रत्यक्षत्वात्, प्रत्यक्षधर्म्माश्रयत्वाच्च। तर्काश्चात्र भवन्ति आदिमत्त्वे प्रथमप्रवृत्त्यनुपपत्तौ सर्वदैवाप्रवृत्तिप्रसङ्गः। सान्तत्वेऽनादेः सत्त्वानुपपत्तिप्रसङ्गः। अद्रव्यत्वे निर्गुणत्वप्रसङ्गः अविभुत्वे दहनपवनादेः क्रियानुपपत्तिप्रसङ्गः। नच संयुक्तसंयोगात् तदुत्पत्तिः साक्षात्क्रियाद्वारकस्य तस्याभावात् अतथाभूतस्य तद्धेतुत्वेऽतिप्रसङ्गात्। मूर्त्तत्वे नित्यस्यास्मदादिप्रत्यक्षधर्म्मानाधारत्वप्रसङ्गः विशेषगुणवतस्यारम्भकत्वप्रसङ्गः, सक्रियत्वे मूर्त्तत्वप्रसङ्ग इति शास्त्रार्थसंग्रहः। अणुरेवासौ विज्ञानासमवायिकारणसंयोगाधारत्वात् मनोवत् “अणीयांसमणोरपीति” बाधविरोधाविति कश्चित् तदयुक्तम् आत्मन्यविभौ मनसोऽणुत्वासिद्धेः तत्संयोगक्रमादेव क्रियाक्रमोपपत्तेः आगमस्तु “महतोऽपि महीयांसमिति” प्रथमपदमपहाय उपन्यस्तस्तदलमित्यन्तेन” ।

स्कन्धपञ्चकस्यात्मत्ववादिनां मतं संघातानुत्पत्त्या शा० सू० भा० निराकृतम् यथा ‘समुदाय उभयहेतुकेऽपि तदप्राप्तिः” सू० ‘तत्रैते त्रयोवादिनो भवन्ति। केचित् सर्व्वास्तित्ववादिनः केचिद्विज्ञानास्तित्वमात्रवादिनः अन्ये पुनः सर्व्वशून्यत्ववादिनः इति। तत्र ये सर्व्वास्तित्ववादिनोबाह्यमान्तरञ्च वस्त्वभ्युपगच्छन्ति भूतं भौतिकं चित्तं चैत्तञ्च तान् तावत् प्रति ब्रूमः। तत्र भूतं पृथिवीधात्वादयः। भौतिकं रूपादयश्चक्षुरादयश्च चतुष्टये च पृथि-